# ॥ मन्त्रसिद्धिप्रद आद्या काली ध्यानम् ॥

ॐ अस्य श्रीमन्त्रसिद्धिप्रद ध्यान महामन्त्रस्य महाकालभैरव ऋषिः अनुष्टुप् छन्दः श्री आद्या भगवती कालिका देवता सर्वसिद्ध्यर्थे जपे विनियोगः ।

विद्युत्कान्तिसमानाभदन्तपङ्क्तिबलाकिनीम् ।
प्रावृड्सम्भूतसुस्निग्धनवमेघसमद्युतिम् ॥
मुण्डमालावळीरम्यां मुक्तकेशीं दिगम्बराम् ।
लोलजिह्वां घोररावामारक्तलोचनत्रयाम् ॥
कोटिकोटिकलानाथविगलन्मुखमण्डलाम् ।
अमाकलासमुल्लासकिरीटोज्ज्वलमण्डलाम् ॥
शवद्वयकर्णभूषां नानामणिविभूषिताम् ।
सूर्यकान्तेन्दुकान्तौघप्रोल्लसत्कर्णभूषणाम् ॥
मृतहस्तसहस्रैस्तु कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥
खड्गमुण्डवराभीतिसंशोभितचतुर्भुजाम् ।
दन्तुरां परमां नित्यां रक्तमण्डितविग्रहाम् ॥
शिवप्रेतसमारूढां महाकालोपरिस्थिताम् ।
वामपादं शवहृदि दक्षिणे लोकलाञ्छितम् ॥
कोटिसूर्यप्रतीकाशं समस्तभुवनोज्ज्वलम् ।
विद्युत्पुञ्जसमानाभज्वलज्जटविराजितम् ॥
रजताद्रिसमं देवं स्फटिकाचलविग्रहम् ।

दिगम्बरं महाघोरं चन्द्रार्कपरिमण्डितम् ॥

नानालङ्कारभूषाढ्यं भास्वत्स्वर्णतनूरुहम् ।

योगनिद्राधरं शम्भुं स्मेराननसरोरुहम् ॥

विपरीतरतासक्तां महाकालेन सन्ततम् ।

अशेषब्रह्माण्डभाण्डप्रकाशितमहोज्ज्वलाम् ॥

शिवाभिर्घोररावाभिर्वेष्टितां प्रळयोदिताम् ।

कोटिकोटिशरच्चन्द्रन्यक्कृतानखमण्डलाम् ॥

क्षुधापूर्णशीर्षहस्तयोगिनीभिर्विराजिताम् ।

घोररूपैर्महानादैश्चण्डतापैश्च भैरवैः ।

नृत्यद्भिर्वादनपरैरनिशञ्च दिगम्बरैः ॥

श्मशानालयमध्यस्थां ब्रह्माद्युपनिषेविताम् ।

सर्वसिद्धिप्रदां कालीं ध्यायामि परमेश्वरीम् ॥

॥ इति शिवम् ॥

**|| mantrasiddhiprada ādyā kālī dhyānam ||**

om asya śrīmantrasiddhiprada dhyāna mahāmantrasya mahākālabhairava ṛṣiḥ anuṣṭup chandaḥ śrī ādyā bhagavatī kālikā devatā sarvasiddhyarthe jape viniyogaḥ |

vidyutkāntisamānābhadantapaṅktibalākinīm |
prāvṛḍsambhūtasusnigdhanavameghasamadyutim ||
muṇḍamālāvaḷīramyāṁ muktakeśīṁ digambarām |
lolajihvāṁ ghorarāvāmāraktalocanatrayām ||
koṭikoṭikalānāthavigalanmukhamaṇḍalām |
amākalāsamullāsakirīṭojjvalamaṇḍalām ||
śavadvayakarṇabhūṣāṁ nānāmaṇivibhūṣitām |
sūryakāntendukāntaughaprollasatkarṇabhūṣaṇām ||
mṛtahastasahasraistu kṛtakāñcīṁ hasanmukhīm |

sṛkkadvayagaladraktadhārāvisphuritānanām ||
khaḍgamuṇḍavarābhītisaṁśobhitacaturbhujām |
danturāṁ paramāṁ nityāṁ raktamaṇḍitavigrahām ||
śivapretasamārūḍhāṁ mahākāloparisthitām |
vāmapādaṁ śavahṛdi dakṣiṇe lokalāñchitam ||
koṭisūryapratīkāśaṁ samastabhuvanojjvalam |
vidyutpuñjasamānābhajvalajjaṭavirājitam ||
rajatādrisamaṁ devaṁ sphaṭikācalavigraham |
digambaraṁ mahāghoraṁ candrārkaparimaṇḍitam ||
nānālaṅkārabhūṣāḍhyaṁ bhāsvatsvarṇatanūruham |
yoganidrādharaṁ śambhuṁ smerānanasaroruham ||
viparītaratāsaktāṁ mahākālena santatam |
aśeṣabrahmāṇḍabhāṇḍaprakāśitamahojjvalām ||
śivābhirghorarāvābhirveṣṭitāṁ pralayoditām |
koṭikoṭiśaraccandranyakkṛtānakhamaṇḍalām ||
kṣudhāpūrṇaśīrṣahastayoginībhirvirājitām |
ghorarūpairmahānādaiścaṇḍatāpaiśca bhairavaiḥ |
nṛtyadbhirvādanaparairaniśañca digambaraiḥ ||
śmaśānālayamadhyasthāṁ brahmādyupaniṣevitām |
sarvasiddhipradāṁ kālīṁ dhyāyāmi parameśvarīm ||

|| iti śivam ||

www.kamakotimandali.com